# श्रीमद् भागवत रसिक कुटुंब

## शिव महिम्न स्तोत्रम्

श्रीमद्भागवत का यह सार
भगवद् भक्ति ही आधार

### अथ श्री शिवमहिम्नस्तोत्रम् ॥

**महिम्नः(फ्) पारं(न्) ते परमविदुषो यद्य सदृशी**

**स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।**

**अथाऽवाच्यः(स्) सर्वः(स्) स्वमतिपरिणामावधि गृणन्**

**ममाप्येष स्तोत्रे हर निरपवादः(फ्) परिकरः ॥ 1 ॥**

**अतीतः(फ्) पन्थानं(न्) तव च महिमा वाङ्मनसयोः**

**अतद्व्यावृत्त्या यं(ञ्) चकितमभिधत्ते श्रुतिरपि ।**

**स कस्य स्तोतव्यः(ख्) कतिविधगुणः(ख्) कस्य विषयः**

**पदे त्वर्वाचीने पतति न मनः(ख्) कस्य न वचः ॥ 2 ॥**

**मधुस्फीता वाचः(फ्) परमममृतं(न्) निर्मितवतः**

**तव ब्रह्मन् किं(वँ) वागपि सुरगुरोर्विस्मयपदम् ।**

**मम त्वेतां(वँ) वाणीं(ङ्) गुणकथनपुण्येन भवतः**

**पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ 3 ॥**

तवैश्वर्यं(यँ) यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं(न्) तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं(वँ) व्याक्रोशीं(वँ) विदधत इहैके जडधियः ॥ 4 ॥

किमीहः(ख्) किङ्कायः(स्) स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसर दुःस्थो हतधियः
कुतर्कोऽयं(ङ्) काम्श्चित् मुखरयति मोहाय जगतः ॥ 5 ॥

अजन्मानो लोकाः(ख्) किमवयववन्तोऽपि जगतां
अधिष्ठातारं(ङ्) किं(म्) भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः(फ्) परिकरो
यतो मन्दास्त्वां(म्) प्रत्यमरवर संशेरत इमे ॥ 6 ॥

त्रयी सांख्यं(यँ) योगः(फ्) पशुपतिमतं(वँ) वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः(फ्) पथ्यमिति च ।
रुचीनां(वँ) वैचित्र्यादृजुकुटिल नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ 7 ॥

महोक्षः(ख्) खट्वाङ्गं(म्) परशुरजिनं(म्) भस्म फणिनः
कपालं(ञ्) चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां(न्) तामृद्धिं(न्) दधति तु भवद्भूप्रणिहितां
न हि स्वात्मारामं(वँ) विषयमृगतृष्णा भ्रमयति ॥ 8 ॥

ध्रुवं(ङ्) कश्चित् सर्वं(म्) सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याऽध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां(न्) न खलु ननु धृष्टा मुखरता ॥ 9 ॥

तवैश्वर्यं(यँ) यत्नाद् यदुपरि विरिंचिर्हरिरधः
परिच्छेतुं(यँ) यातावनलमनलस्कंधवपुषः ।
ततो भक्तिश्रद्धा-भरगुरु-गृणद्भ्यां(ङ्) गिरिश यत्
स्वयं(न्) तस्थे ताभ्यां(न्) तव किमनुवृत्तिर्न फलति ॥ 10 ॥

अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डू-परवशान् ।
शिरः(फ्)पद्मश्रेणी-रचितचरणांभोरुह-बलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ 11 ॥

अमुष्य त्वत्सेवा-समधिगतसारं(म्) भुजवनं(म्)
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ 12 ॥

यदृद्धिं(म्) सुत्राम्णो वरद परमोच्चैरपि सतीं
अधश्चक्रे बाणः(फ्) परिजनविधेयत्रिभुवनः ।
न तच्चित्रं(न्) तस्मिन् वरिवसितरि त्वच्चरणयोः
न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ 13 ॥

अकाण्ड-ब्रह्माण्ड-क्षयचकित-देवासुरकृपा
विधेयस्याऽऽसीद् यस्त्रिनयन विषं(म्) संहृतवतः ।
स कल्माषः(ख्) कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवन-भय- भङ्ग- व्यसनिनः ॥ 14 ॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं(ङ्) जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः(स्) स्मर्तव्यात्मा न हि वशिषु पथ्यः(फ्) परिभवः ॥ 15 ॥

मही पादाघाताद् व्रजति सहसा सम्शयपदं
पदं(वँ) विष्णोर्भ्राम्यद् भुज-परिघ-रुग्ण-ग्रह- गणम् ।
मुहुर्द्यौर्दौस्थ्यं(यँ) यात्यनिभृत-जटा-ताडित-तटा
जगद्रक्षायै त्वं(न्) नटसि ननु वामैव विभुता ॥ 16 ॥

वियद्व्यापी तारा-गण-गुणित-फेनोद्गम-रुचिः
प्रवाहो वारां(यँ) यः(फ्) पृषतलघुदृष्टः(श्) शिरसि ते ।
जगद्द्वीपाकारं(ञ्) जलधिवलयं(न्) तेन कृतमिति
अनेनैवोन्नेयं(न्) धृतमहिम दिव्यं(न्) तव वपुः ॥ 17 ॥

रथः(ह) क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथ-चरण-पाणिः(श्) शर इति ।
दिधक्षोस्ते कोऽयं(न्) त्रिपुरतृणमाडंबर-विधिः
विधेयैः(ख्) क्रीडन्त्यो न खलु परतन्त्राः(फ्) प्रभुधियः ॥ 18 ॥

हरिस्ते साहस्रं(ङ्) कमल बलिमाधाय पदयोः
यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः(फ्) परिणतिमसौ चक्रवपुषः
त्रयाणां(म्) रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ 19 ॥

क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं(म्) फलति पुरुषाराधनमृते ।
अतस्त्वां(म्) संम्प्रेक्ष्य क्रतुषु फलदान-प्रतिभुवं
श्रुतौ श्रद्धां(म्) बध्वा दृढपरिकरः(ख्) कर्मसु जनः ॥ 20 ॥

क्रियादक्षो दक्षः(ख्) क्रतुपतिरधीशस्तनुभृतां
ऋषीणामार्त्विज्यं(म्) शरणद सदस्याः(स्) सुर-गणाः ।
क्रतुभ्रम्शस्त्वत्तः(ख्) क्रतुफल-विधान-व्यसनिनः
ध्रुवं(ङ्) कर्तुः(श्) श्रद्धा-विधुरमभिचाराय हि मखाः ॥ 21 ॥

प्रजानाथं(न्) नाथ प्रसभमभिकं(म्) स्वां(न्) दुहितरं
गतं(म्) रोहिद् भूतां(म्) रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं(न्) दिवमपि सपत्राकृतममुं
त्रसन्तं(न्) तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ 22 ॥

स्वलावण्याशम्सा धृतधनुषमह्नाय तृणवत्
पुरः(फ्) प्लुष्टं(न्) दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं(न्) देवी यमनिरत-देहार्ध-घटनात्
अवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ 23 ॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः(स्) सहचराः
चिता-भस्मालेपः(स्) स्रगपि नृकरोटी-परिकरः ।
अमङ्गल्यं(म्) शीलं(न्) तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां(वँ) वरद परमं(म्) मङ्गलमसि ॥ 24 ॥

मनः(फ्) प्रत्यक्चित्ते सविधमविधायात्त-मरुतः
प्रहृष्यद्रोमाणः(फ्) प्रमद-सलिलोत्सङ्गति-दृशः ।
यदालोक्याह्लादं(म्) ह्रद इव निमज्यामृतमये
दधत्यंतस्तत्त्वं(ङ्) किमपि यमिनस्तत् किल भवान् ॥ 25 ॥

त्वमर्कस्त्वं(म्) सोमस्त्वमसि पवनस्त्वं(म्) हुतवहः
त्वमापस्त्वं(वँ) व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं(न्) त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं(वँ) वयमिह तु यत् त्वं(न्) न भवसि ॥ 26 ॥

त्रयीं(न्) तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरान्
अकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं(न्) ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं(वँ) व्यस्तं(न्) त्वां(म्) शरणद गृणात्योमिति पदम् ॥ 27 ॥

भवः(श्) शर्वो रुद्रः(फ्) पशुपतिरथोग्रः(स्) सहमहान्
तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं(म्) प्रविचरति देव श्रुतिरपि
प्रियायास्मैधाम्ने प्रणिहित-नमस्योऽस्मि भवते ॥ 28 ॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमः
नमः(ह) क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमः
नमः(स्) सर्वस्मै ते तदिदमतिसर्वाय च नमः ॥ 29 ॥

बहुल-रजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबल-तमसे तत् सम्हारे हराय नमो नमः ।
जन-सुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ 30 ॥

कृश-परिणति-चेतः(ख्) क्लेशवश्यं(ङ्) क्व चेदं
क्व च तव गुण-सीमोल्लंघिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां(म्) भक्तिराधात्
वरद चरणयोस्ते वाक्य-पुष्पोपहारम् ॥ 31 ॥

असित-गिरि-समं(म्) स्यात् कज्जलं(म्) सिन्धु-पात्रे
सुर-तरुवर-शाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं(न्) न याति ॥ 32 ॥

असुर-सुर-मुनीन्द्रैरर्चितस्येन्दु-मौलेः
ग्रथित-गुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकल-गण-वरिष्ठः(फ्) पुष्पदन्ताभिधानः
रुचिरमलघुवृत्तैः(स्) स्तोत्रमेतच्चकार ॥ 33 ॥

अहरहरनवद्यं(न्) धूर्जटेः(स्) स्तोत्रमेतत्
पठति परमभक्त्या शुद्ध-चित्तः(फ्) पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतर-धनायुः(फ्) पुत्रवान् कीर्तिमांश्च ॥ 34 ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं(ङ्) गुरोः(फ्) परम् ॥ 35 ॥

दीक्षा दानं(न्) तपस्तीर्थं(ञ्) ज्ञानं(यँ) यागादिकाः(ख्) क्रियाः ।
महिम्नस्तव पाठस्य कलां(न्) नार्हन्ति षोडशीम् ॥ 36 ॥

कुसुमदशन-नामा सर्व-गन्धर्व-राजः
शशिधरवर-मौलेर्देवदेवस्य दासः ।
स खलु निज-महिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्य-दिव्यं(म्) महिम्नः ॥ 37 ॥

सुरगुरुमभिपूज्य स्वर्ग-मोक्षैक-हेतुं
पठति यदि मनुष्यः(फ्) प्राञ्जलिर्नान्य चेताः ।
व्रजति शिव-समीपं(ङ्) किन्नरैः(स्) स्तूयमानः
स्तवनमिदममोघं(म्) पुष्पदन्तप्रणीतम् ॥ 38 ॥

आसमाप्तमिदं(म्) स्तोत्रं(म्) पुण्यं(ङ्) गन्धर्व-भाषितम् ।
अनौपम्यं(म्) मनोहारि सर्वमीश्वरवर्णनम् ॥ 39 ॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्कर-पादयोः ।
अर्पिता तेन देवेशः(फ्) प्रीयतां(म्) मे सदाशिवः ॥ 40 ॥

तव तत्त्वं(न्) न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥ 41 ॥

एककालं(न्) द्विकालं(वँ) वा त्रिकालं(यँ) यः(फ्) पठेन्नरः ।
सर्वपाप-विनिर्मुक्तः(श्) शिव लोके महीयते ॥ 42 ॥

श्री पुष्पदन्त-मुख-पङ्कज-निर्गतेन
स्तोत्रेण किल्बिष-हरेण हर-प्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥ 43 ॥

॥ इति श्री पुष्पदन्त विरचितं शिवमहिम्नः स्तोत्रं समाप्तम्

# श्री शिव ताण्डव  स्तोत्रं

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां(म्) भुजङ्गतुङ्गमालिकाम् ।
डमड् – डमड् – डमड् – डमन् – निनादवड्  डमर्वयं
चकार चण्डताण्डवं(न्) तनोतु नः(श्) शिवः(श्) शिवम् ॥ 1 ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद् – धगद् – धगज् – ज्वलल् – ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः(फ्) प्रतिक्षणं(म्) मम ॥ 2 ॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥ 3 ॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं(म्) बिभर्तु भूतभर्तरि ॥ 4 ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां(ञ्) चकोरबंधुशेखरः ॥ 5 ॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
निपीतपंचसायकं(न्) नमन्निलिंपनायकम् ।
सुधामयूखलेखया विराजमानशेखरं(म्)
महाकपालि सम्पदे शिरो जटालमस्तु नः ॥ 6 ॥

करालभालपट्टिका – धगद् – धगद् – धगज् – ज्वलद् -
धनञ्जयाधरीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥ 7 ॥

नवीनमेघमण्डली- निरुद्धदुर्धरस्फुरत्-
कुहूनिशीथिनीतमः(फ्) प्रबन्धबन्धुकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः(श्) श्रियं(ञ्) जगद्धुरन्धरः ॥ 8 ॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं(म्) पुरच्छिदं(म्) भवच्छिदं(म्) मखच्छिदं(म्)
गजच्छिदान्धकच्छिदं(न्) तमंतकच्छिदं(म्) भजे ॥ 9 ॥

अखर्वसर्वमलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरी- विजृम्भणामधुव्रतम् ।
स्मरान्तकं(म्) पुरान्तकं(म्) भवान्तकं(म्) मखान्तकं(म्)
गजान्तकान्धकान्तकं(म्) तमन्तकान्तकं(म्) भजे ॥ 10 ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-
द्विनिर्गमत्क्रमस्फुरत्करालफालहव्यवाट् ।
धिमिद् – धिमिद् – धिमिद् – ध्वनन् - मृदङ्गतुङ्गमङ्गल -
ध्वनिक्रमप्रवर्तित -प्रचण्डताण्डवः(श्) शिवः ॥ 11 ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्-
गरिष्ठरत्नलोष्ठयोः(स्) सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः(फ्) प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः(ख्) कदा सदाशिवं(म्) भजाम्यहम् ॥ 12 ॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः(स्) सदा शिरः(स्)स्थमञ्जलिं(वँ) वहन् ।
विलोललोल लोचनो ललामभाललग्नकः
शिवेति मन्त्रमुच्चरन् सदा सुखी भवाम्यहम् ॥ 13 ॥

इमं(म्) हि नित्यमेवमुक्तमुत्तमोत्तमं(म्) स्तवं(म्)
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं(म्)
विमोहनं(म्) हि देहिनां(म्) सुशङ्करस्य चिन्तनम् ॥ 14 ॥

पूजावसानसमये दशवक्त्रगीतं(म्)
यः(श्) शम्भुपूजनपरं(म्) पठति प्रदोषे ।
तस्य स्थिरां(म्) रथगजेन्द्रतुरङ्गयुक्तां(म्)
लक्ष्मीं(म्) सदैव सुमुखीं(म्) प्रददाति शम्भुः ॥ 15 ॥

॥ इति श्री रावण कृतं श्री शिव ताण्डव स्तोत्रं संपूर्णम्

# शिव मानस पूजा

रत्नैः(ख्) कल्पितमासनं(म्) हिमजलैः(स्) स्नानं(ञ्) च दिव्याम्बरं

**नानारत्न विभूषितं(म्) मृगमदा मोदाङ्कितं(ञ्) चन्दनम् ।**
**जाती चम्पक बिल्वपत्र रचितं(म्) पुष्पं(ञ्) च धूपं(न्) तथा**
**दीपं(न्) देव दयानिधे पशुपते हृत्कल्पितं(ङ्) गृह्यताम् ॥ 1 ॥**

**सौवर्णे नवरत्नखण्ड रचिते पात्रे घृतं(म्) पायसं**
**भक्ष्यं(म्) पञ्चविधं(म्) पयोदधियुतं(म्) रम्भाफलं(म्) पानकम् ।**
**शाकानामयुतं(ञ्) जलं(म्) रुचिकरं(ङ्) कर्पूर खण्डोज्ज्चलं**
**ताम्बूलं(म्) मनसा मया विरचितं(म्) भक्त्या प्रभो स्वीकुरु ॥ 2 ॥**

**छत्रं(ञ्) चामरयोर्युगं(वँ्) व्यजनकं(ञ्) चादर्शकं(न्) निर्मलं**
**वीणा भेरि मृदङ्ग काहलकला गीतं(ञ्) च नृत्यं(न्) तथा ।**
**साष्टाङ्गं(म्) प्रणतिः(स्) स्तुति-र्बहुविधा-ह्येतत्-समस्तं(म्) मया**
**सङ्कल्पेन समर्पितं(न्) तव विभो पूजां(ङ्) गृहाण प्रभो ॥ 3 ॥**

**आत्मा त्वं(ङ्) गिरिजा मतिः(स्) सहचराः(फ्) प्राणाः(श्) शरीरं(ङ्) गृहं**
**पूजा ते विषयोपभोग-रचना निद्रा समाधिस्थितिः ।**
**सञ्चारः(फ्) पदयोः(फ्) प्रदक्षिणविधिः(स्) स्तोत्राणि सर्वा गिरो**
**यद्यत्कर्म करोमि तत्तदखिलं(म्) शम्भो तवाराधनम् ॥ 4 ॥**

**कर चरण कृतं(वँ्) वाक्कायजं(ङ्) कर्मजं(वँ्) वा**
**श्रवण नयनजं(वँ्) वा मानसं(वँ्) वापराधम् ।**
**विहितमविहितं(वँ्) वा सर्वमेतत्-क्षमस्व**
**जय जय करुणाब्धे श्री महादेव शम्भो ॥ 5 ॥**